# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

## अध्याय ३६

ततः पितामहं दृष्ट्वा वायुः पुत्रवधार्दितः ।
शिशुकं तं समादाय उत्तस्थौ धातुरग्रतः ॥ १ ॥

चलत्कुण्डलमौलिस्रक्तपनीयविभूषणः ।
पादयोर्न्यपतद्वायुस्तिस्रोऽ वस्थाय वेधसे ॥ २ ॥

तं तु वेदविदाद्यस्तु लम्बाभरणशोभिना ।
वायुमुत्थाप्य हस्तेन शिशुं तं परिमृष्टवान् ॥ ३ ॥

स्पृष्टमात्रस्ततः सोऽथ सलीलं पद्मजन्मना ।
जलसिक्तं यथा सस्यं पुनर्जीवितमाप्तवान् ॥ ४ ॥

प्राणवन्तमिमं दृष्ट्वा प्राणो गन्धवहो मुदा ।
चचार सर्वभूतेषु संनिरुद्धं यथापुरा ॥ ५ ॥

मरुद्रोगविनिर्मुक्ताः प्रजा वै मुदिताभवन् ।
शीतवातविनिर्मुक्ताः पद्मिन्य इव साम्बुजाः ॥ ६ ॥

ततस्त्रियुग्मस्त्रिककुत्त्रिधामा त्रिदशार्चितः ।
उवाच देवता ब्रह्मा मारुतप्रियकाम्यया ॥ ७ ॥

भो महेन्द्राग्निवरुणधनेश्वरमहेश्वराः ।
जानतामपि तत्सर्वं हितं वक्ष्यामि श्रूयताम् ॥ ८ ॥

अनेन शिशुना कार्यं कर्तव्यं वो भविष्यति ।
ददतास्य वरान्सर्वे मारुतस्यास्य तुष्टिदान् ॥ ९ ॥

ततः सहस्रनयनः प्रीतिरक्तः शुभाननः ।
कुशे शयमयीं मालां समुत्क्षिप्येदमब्रवीत् ॥ १० ॥

मत्करोत्सृष्टवज्रेण हनुरस्य यथा क्षतः ।
नाम्नैष कपिशार्दूलो भविता हनुमानिति ॥ ११ ॥

अहमेवास्य दास्यामि परमं वरमुत्तमम् ।
अतः प्रभृति वज्रस्य ममावध्यो भविष्यति ॥ १२ ॥

मार्ताण्डस्त्वब्रवीत्तत्र भगवांस्तिमिरापहः ।
तेजसोऽस्य मदीयस्य ददामि शतिकां कलाम् ॥ १३ ॥

यदा तु शास्त्राण्यध्येतुं शक्तिरस्य भविष्यति ।
तदास्य शास्त्रं दास्यामि येन वाग्मी भविष्यति ॥ १४ ॥

वरुणश्च वरं प्रादान्नास्य मृत्युर्भविष्यति ।
वर्षायुतशतेनापि मत्पाशादुदकादपि ॥ १५ ॥

यमोऽपि दण्डावध्यत्वमरोगत्वं च नित्यशः ।
दिशतेऽस्य वरं तुष्ट अविषादं च संयुगे ॥ १६ ॥

गदेयं मामिका नैनं संयुगेषु वधिष्यति ।
इत्येवं वरदः प्राह तदा ह्येकाक्षिपिङ्गलः ॥ १७ ॥

मत्तो मदायुधानां च न वध्योऽयं भविष्यति ।
इत्येवं शङ्करेणापि दत्तोऽस्य परमो वरः ॥ १८ ॥

सर्वेषां ब्रह्मदण्डानामवध्योऽयं भविष्यति ।
दीर्घाअयु"स्च महात्मा च इति ब्रह्माब्रवीद्वच् ॥ १९ ॥

विश्वकर्मा तु दृष्ट्वैनं बालसूर्योपमं शिशुम् ।
शिल्पिना प्रवरः प्राह वरमस्य महामतिः ॥ २० ॥

विनिर्मितानि देवानामायुधानीह यानि तु ।
तेषां सङ्ग्रामकाले तु अवध्योऽयं भविष्यति ॥ २१ ॥

ततः सुराणां तु वरैर्दृष्ट्वा ह्येनमकङ्कृतम् ।
चतुर्मुखस्तुष्टमुखो वायुमाह जगद्गुरुः ॥ २२ ॥

अमित्राणां भयकरो मित्राणामभयङ्करः ।
अजेयो भविता तेऽत्र पुत्रो मारुतमारुतिः ॥ २३ ॥

रावणोत्सादनार्थानि रामप्रीतिकराणि च ।
रोमहर्षकराण्येष कर्ता कर्माणि संयुगे ॥ २४ ॥

एवमुक्त्वा तमामन्त्र्य मारुतं तेऽमरैः सह ।
यथागतं ययुः सर्वे पितामहपुरोगमाः ॥ २५ ॥

सोऽपि गन्धवहः पुत्रं प्रगृह्य गृहमानयत् ।

अञ्जनायास्तमाख्याय वरं दत्तं विनिःसृतः ॥ २६॥

प्राप्य राम वरानेष वरदानबलान्वितः ।
बलेनात्मनि संस्थेन सोऽपूर्यत यथार्णवः ॥ २७॥

बलेनापूर्यमाणो हि एष वानरपुङ्गवः ।
आश्रमेषु महर्षीणामपराध्यति निर्भयः ॥ २८॥

स्रुग्भाण्डानग्निहोत्रं च वल्कलानां च सञ्चयान् ।
भग्नविच्छिन्नविध्वस्तान्सुशान्तानां करोत्ययम् ॥ २९॥

सर्वेषां ब्रह्मदण्डानामवध्यं ब्रह्मणा कृतम् ।
जानन्त ऋषयस्तं वै क्षमन्ते तस्य नित्यशः ॥ ३०॥

यदा केषरिणा त्वेष वायुना साञ्जनेन च ।
प्रतिषिद्धोऽपि मर्यादां लङ्घयत्येव वानरः ॥ ३१॥

ततो महर्षयः क्रुद्धा भृग्वङ्गिरसवंशजाः ।
शेपुरेनं रघुश्रेष्ठ नातिक्रुद्धातिमन्यवः ॥ ३२॥

बाधसे यत्समाश्रित्य बलमस्मान्प्लवङ्गम ।
तद्दीर्घकालं वेत्तासि नास्माकं शापमोहितः ॥ ३३॥

ततस्तु हृततेजौजा महर्षिवचनौजसा ।
एषो श्रमाणि नान्येति मृदुभावगतश् चरन् ॥ ३४॥

अथ ऋक्षरजा नाम वालिसुग्रीवयोः पिता ।
सर्ववानरराजासीत्तेजसा इव भास्करः ॥ ३५॥

स तु राज्यं चिरं कृत्वा वानराणां हरीश्वरः ।
ततस्त्वर्क्षरजा नाम कालधर्मेण सङ्गतः ॥ ३६॥

तस्मिन्नस्तमिते वाली मन्त्रिभिर्मन्त्रकोविदैः ।
पित्र्ये पदे कृतो राजा सुग्रीवो वालिनः पदे ॥ ३७॥

सुग्रीवेण समं त्वस्य अद्वैधं छिद्रवर्जितम् ।
अहार्यं सख्यमभवदनिलस्य यथाग्निना ॥ ३८॥

एष शापवशादेव न वेदबलमात्मनः ।
वालिसुग्रीवयोर्वैरं यदा रामसमुत्थितम् ॥ ३९॥

न ह्येष राम सुग्रीवो भ्राम्यमाणोऽपि वालिना ।
वेदयानो न च ह्येष बलमात्मनि मारुतिः ॥ ४०॥

पराक्रमोत्साह मतिप्रतापैः
सौशील्यमाधुर्यनयानयैश् च ।
गाम्भीर्यचातुर्यसुवीर्यधैर्यैर्
हनूमतः कोऽप्यधिकोऽस्ति लोके ॥ ४१॥

असौ पुरा व्याकरणं ग्रहीष्यन्
सूर्योन्मुखः पृष्ठगमः कपीन्द्रः ।
उद्यद्गिरेरस्तगिरिं जगाम
ग्रन्थं महद्धारयदप्रमेयः ॥ ४२॥

प्रवीविविक्षोरिव सागरस्य
लोकान्दिधक्षोरिव पावकस्य ।
लोकक्षयेष्वेव यथान्तकस्य
हनूमतः स्थास्यति कः पुरस्तात् ॥ ४३॥

एषोऽपि चान्ये च महाकपीन्द्राः
सुग्रीवमैन्दद्विविदाः सनीलाः ।
सतारतारेयनलाः सरम्भास्
त्वत्कारणाद्राम सुरैर्हि सृष्टाः ॥ ४४॥

तदेतत्कथितं सर्वं यन्मां त्वं परिपृच्छसि ।
हनूमतो बालभावे कर्मैतत्कथितं मया ॥ ४५॥

दृष्टः सम्भाषितश्चासि राम गच्छमहे वयम् ।
एवमुक्त्वा गताः सर्वे ऋषयस्ते यथागतम् ॥ ४६॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com